# ॥ श्री सूक्तम् ॥

ॐ

हिरण्यवर्णां हरिणीं सुवर्ण रजत स्रजाम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

तां म आवह जातवेदो लक्ष्मीमनप गामिनीम् ।
यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहम् ॥

अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मादेवीः जुषताम् ॥

कां सोस्मितां हिरण्य प्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥

चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदंतु मायांतरायाश्च बाह्या अलक्ष्मीः ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीगं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ॥
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥

कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥

आपः सृजंतु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ।
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गळां पद्ममालिनीम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् , विंदेयं पुरुषानहम् ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्य मन्वहम् ।
श्रियः पंचदशर्चं च श्रीकामः सततं जपेत् ।
पद्मानने पद्म ऊरू पद्माक्षी पद्मसंभवे ।
त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहम् ॥

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥

पुत्रपौत्र धनं धान्यं हस्त्यश्वादिगवे रथम् ।
प्रजानां भवसि माता आयुष्मंतं करोतु माम् ॥

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिंद्रो बृहस्पतिर्वरुणं धनमश्नु ते ॥

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनि ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवंति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा ॥

वर्षंतु ते विभावरि दिवो अभ्रस्य विद्युतः ।
रोहंतु सर्वबीजान्यव ब्रह्म द्विषो जहि ॥

पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदळायताक्षि ।
विश्वप्रिये विष्णु मनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी ।
गंभीरा वर्तनाभिः स्तनभर नमिता शुभ्र वस्त्रोत्तरीया ॥

लक्ष्मीर्दिव्यै–र्गजेंद्रैर्मणिगण खचितै–स्स्नापिता हेमकुंभैः ।
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमांगळ्ययुक्ता ॥
लक्ष्मीं क्षीरसमुद्र राजतनयां श्री रंगधामेश्वरीम् ।
दासी भूत समस्त देव वनितां लोकैक दीपांकुराम् ।

श्री मन्मंदकटाक्षलब्ध विभव ब्रह्मेंद्रगंगाधराम् ।
त्वां त्रैलोक्य कुटुंबिनीं सरसिजां वंदे मुकुंदप्रियाम् ॥

सिद्धलक्ष्मी-र्मोक्षलक्ष्मी-र्जयलक्ष्मीस्सरस्वती ।
श्री लक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा ।
वरांकुशौ पाशमभीतिमुद्रां करैर्वहंतीं कमलासनस्थाम् ।
बालार्क कोटि प्रतिभां त्रिणेत्रां भजेहमाद्यां जगदीश्वरीं त्वाम् ॥

सर्वमंगळ मांगळ्ये शिवे सर्वार्थ साधिके।
शरण्ये त्र्यंबके देवि नारायणि नमोऽस्तु ते ॥
नारायणि नमोऽस्तु ते ॥
नारायणि नमोऽस्तु ते ॥

सरसिज निलये सरोज हस्ते धवळतरांशुक गंधमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीद मह्यम् ॥

विष्णुपत्नीं क्षमा देवीं माधवीं माधवप्रियाम् ।
विष्णोः प्रियसखीं देवीं नमाम्यच्युत वल्लभाम् ॥

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

श्री वर्चस्यं आयुष्यं आरोग्यमाविधात् पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
ऋणरोगादि दारिद्य पापक्षुदपमृत्यवः ।
भयशोक मनस्तापा नश्यंतु मम सर्वदा ॥

श्रिये जात श्रिय आनिर्याय श्रियं वयो जनितृभ्यो दधातु ।
श्रियं वसाना अमृतत्वमायन् भजंति सद्यः सविता विदध्यून् ॥
श्रिय एवैनं तच्छ्रियामादधाति ।
संततमृचा वषट्कृत्यं संधत्तं संधीयते प्रजया पशुभिः ।
य एवं वेद ।
ओं महादेव्यै च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥